दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-125 | 1 | फरवरी 25, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणशुक्लाष्टमी
फाल्गुण 13 प्रविष्टांशः मङ्गलमयः भवेत्

2 न्यायालयस्य निर्णयः- भारतीय-युवा-काङ्ग्रेस-अध्यक्षः आरक्षकप्रतिबन्धकगृहे प्रेषितः

3 हिमाचलप्रदेशस्य सुपर- विशेषज्ञ-चिकित्सालये चमियानास्थाने रोबोटिक-शल्यचिकित्सायाः शुल्कं बहु वर्धितम्, उपचारः महत्तर-मूल्यवान् जातम्

5 केन्द्रीय-संस्कृत-विश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेड़ी 'संस्कृतात्मा-पुरस्कारेण' सम्मानितः

## केन्द्रीयमन्त्रिमण्डलेन केरल-राज्यस्य नाम 'केरलम्' इति परिवर्तयितुं प्रस्तावः स्वीकृतः



**हिमसंस्कृतवार्ताः** - केन्द्रीयमन्त्रिमण्डलेन सेवातीर्थस्य सेवा-सङ्कल्प-प्रस्तावस्य अन्तर्गतं नागरिक-केन्द्रित-शासनाय स्वस्य प्रतिबद्धता पुनः पुष्टिः कृता, यस्याः उद्देश्यं सप्तचत्वारिंशदधिक-द्विसहस्रतमवर्षपर्यन्तं भारतं समृद्धं, आत्मनिर्भरं च राष्ट्ररूपेण, विश्वस्य प्रमुखेषु त्रिषु अर्थव्यवस्थासु अन्यतमं कर्तुं च अस्ति। मन्त्रिमण्डलीयसभायाः अनन्तरं नवदेहल्यां प्रसारमाध्यमैः सह वार्तालापं कुर्वन् सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः सूचितवान् यत् मन्त्रिमण्डलेन केरल-राज्यस्य नाम 'केरलम्' इति परिवर्तयितुं प्रस्तावः स्वीकृतः अस्ति। आर्थिक-कार्य-मन्त्रि-सभा-समित्या महाराष्ट्रस्य, मध्यप्रदेशस्य, बिहारस्य, झारखण्डस्य च अष्टमण्डलेषु त्रिषु बहुविधप्रकल्पानां अनुमोदनं कृतम्। मन्त्रिमण्डलेन 'गुजरात-मेट्रो-रेल-कॉर्पोरेशन लिमिटेड' इत्यस्य GIFT नगरात् शाहपुरपर्यन्तं विद्यमानः उत्तर-दक्षिण-मार्गस्यविस्तारोपि अनुमोदितः।

## पर्यटन-नेतृत्व-शिखरसम्मेलनम् उद्घाटितवान् उपराष्ट्रपतिः



**हिमसंस्कृतवार्ताः** - उपराष्ट्रपतिः सी पी राधाकृष्णन् वर्यः नवदेहल्यां यू एस्-इण्डिया स्ट्रेटेजिक् पार्टनरशिप् फ़ोरम् इत्यनेन आयोजिते षड्विंशत्यधिक द्विसहस्रतमवर्षस्य पर्यटन-नेतृत्व-शिखरसम्मेलनम् उद्घाटितवान्। अस्मिन् अवसरे श्रीराधाकृष्णन् वर्यः अवदत् यत्, पर्यटनम् उद्योगात् अपि अधिकम् अस्ति, संस्कृतेः मध्ये सेतुः अस्ति, आर्थिक अवसराणां परिचालकः च अस्ति। सः अवदत् यत्, पर्यटनं मृदु-कूटनीतेः एकं प्रबलं साधनम् अस्ति तथा च भारत-अमेरिका-आर्थिक-मार्गस्य प्रमुखः स्तम्भोपि अस्ति। उपराष्ट्रपतिः राधाकृष्णन् वर्यः अवदत् यत् पर्यटनं वृहत्तम-वृत्यावसर-निर्मातृषु अन्यतमम् अस्ति इति। सः पर्यटनक्षेत्रस्य सर्वसमावेशकं सुस्थिरं च विकासं सुनिश्चेतुं कौशलेषु, उद्यमशीलतायां, महिला-नेतृत्व-उद्यमेषु च निवेशं कर्तुं प्रार्थितवान्।

## सर्वोच्चन्यायालयेन पश्चिमबङ्गस्य मतदातृ-सूच्यां विशेष-सघन-पुनरीक्षणस्य आक्षेपाणां निवारणाय समीपस्थ-राज्ययोः
### सिविलन्यायाधीशाः, न्यायिकपदाधिकारिणः च नियोक्तुम् अनुमतिः प्रदत्ता।



**हिमसंस्कृतवार्ताः** - सर्वोच्चन्यायालयेन कलकत्ता उच्चन्यायालयस्य मुख्यन्यायाधीशं पश्चिमबङ्गस्य मतदातृ-सूच्यां विशेष-सघन-पुनरीक्षणस्य एसआईआर इत्यस्यान्तर्गतं अशीति-लक्ष-आक्षेपाणां निवारणाय समीपस्थ-राज्ययोः झारखण्ड-ओडिशयोः सिविलन्यायाधीशाः, न्यायिकपदाधिकारिणः च नियोक्तुं अनुमतिः प्रदत्ता अस्ति। मुख्यन्यायाधीशस्य सूर्यकान्तस्य नेतृत्वे पीठेन कलकत्ता उच्चन्यायालयस्य मुख्यन्यायाधीशस्य पत्रस्य संज्ञाने अस्मिन् अभ्यासे संलग्नानाम् सार्द्धद्विशत मण्डल-न्यायाधीशानां सत्यापनप्रक्रियां पूर्त्यै प्रायः अशीति दिवसानां आवश्यकता भविष्यति। समयाभावे सर्वोच्चन्यायालयेन अतिरिक्त-सिविल न्यायाधीशानां नियोजनस्य अनुमतिः प्रदत्ता, कलकत्ता उच्चन्यायालयेन च झारखण्डात् ओडिशाराज्यात् च समान-पद-न्यायिक-पदाधिकारिणः अन्वेष्टुं च कथितम्। न्यायालयेन निर्वाचनायोगाय राज्यद्वयोः अधिकारिणां परिनियोजनस्य व्ययः वहतुमपि निर्दिष्टम्। निर्वाचनायोगं फरवरीमासस्य अष्टाविंशति दिनाङ्के अन्तिम-मतदातृ-सूचीं प्रकाशयितुम् अपि अनुमतिः प्रदत्ता तथा च स्पष्टं कृतं यत् सत्यापनावश्यकतायां पूरकसूचयः प्रसारणीयमेव। पूर्वं पश्चिमवङ्गसर्वकारस्य निर्वाचनायोगस्य च विवादस्य विषये चिन्ताम् प्रकटयन् न्यायालयेन संशोधिताभ्यासं समाप्त्यर्थं सहायतायै सेवारतानां पूर्व-मण्डल-न्यायाधीशानां च नियुक्त्यै आदेशः प्रदत्तः आसीत्।

## ज्योतिरादित्यः अरुणाचलप्रदेशस्य त्रयाणां युवतीनां जातीयोत्पीडनस्य प्रकरणे चिन्तां प्रकटितवान्



भारतस्य केंद्रीय-पूर्वोत्तर-क्षेत्र-विकास-मंत्री ज्योतिरादित्य एम्. सिन्धिया वर्यः दक्षिणदेहली-नगरस्य मालवीयनगरे अरुणाचलप्रदेशस्य त्रयाणां युवतीनां जातीयोत्पीडनस्य प्रकरणे चिन्तां प्रकटितवान्। सामाजिकमाध्यमेषु एकस्मिन् लेखे श्री सिन्धिया अवदत् यत् सः अरुणाचलप्रदेशस्य मुख्यमन्त्रिण पेमा खाण्डु इत्यनेन सह वार्तालापं कृतवान्, तथा च अस्मिन् विषये देहली-आरक्षक-आयुक्तेन सह तत्क्षणस्य कठोरस्य क्रियान्वयनस्य विषये चर्चाम् अकरोत्। मन्त्री वर्यः सूचितवान् यत् FIR प्राथमिकी-पञ्जीकृतम् अस्ति तथा च अभियुक्ताः शीघ्रमेव निगडिताः भविष्यन्ति इति आश्वास्यत्। सः इतोऽपि अवदत् यत् पूर्वोत्तरस्य जनानां सुरक्षा-सम्मानं च सर्वोपरि अस्ति, तेषां प्रति कृतः अन्यायः न सह्यते इति।

## अगरतला-कोलकाता-बस-सेवा बहुकालानन्तरम् पुनः समारब्धा



प्रतिवेशिनः बाङ्ग्लादेशस्य वर्तमान राजनैतिक विकासस्य दृष्ट्या, अगरतलातः मार्गेण ढाका-नगरे प्रविश्य कोलकता-नगरं प्रति यात्रि-बसयान-सेवा बहुकालानन्तरम् पुनः समारब्धा। त्रिपुरा-परिवहन-पर्यटन-मन्त्री सुशान्त चौधरी, टी. आर्. टी. सी. इत्यस् अध्यक्षः समर-रायः च आगम्यमानानां यात्रिणां औपचारिक-स्वागतार्थं उपस्थितौ आस्ताम्। परिवहनमन्त्री श्रीचौधरी अस्याः सेवायाः पुनरारम्भे हर्षं प्रकटितवान्। अधिकारिणः प्रोक्तवन्तः यत् बहुप्रतिक्षितायाः अगरतला-ढाका-कोलकाता-अन्ताराष्ट्रिय-बस-सेवायाः पुनः आरम्भेन सीमापार-व्यापारं पर्यटनं च वर्धयिष्यति इति।

## सुभाषितम्

**उत्तमैः सह सङ्गेन,**
**को न याति समुन्नतिम्।**
**मूर्धा तृणानि धार्यन्ते,**
**ग्रथितैः कुसुमैः सह।।**

ऐसा कोई व्यक्ति नहीं होता जो उत्तम जनों की संगति में उन्नति और उच्च पद प्राप्त नहीं कर पाता है। साधारण घास के तिनके भी पुष्पों के साथ गूंथे जाने पर मस्तक पर धारण किए जाते हैं।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे कस्वा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## भारत-इज़राइल-सम्बन्धाः- प्रधानमन्त्रिणः यात्रा

प्रधानमन्त्री नरेन्द्रमोदी द्विदिवसीय-राजकीय-यात्रायै इज़राइल-देशं गमिष्यति। एषा तस्य द्वितीया इज़राइल-यात्रा भविष्यति। अस्मिन् अवसरे श्रीमोदी इज़राइल-देशस्य प्रधानमन्त्रिणा बेन्जामिन नेतन्याहू महोदयेन सह मेलिष्यति। उभौ नेतारौ भारत-इज़राइल-सामरिक-साझेदारी (Strategic Partnership) क्षेत्रे जातस्य महत्त्वपूर्ण-प्रगतेः समीक्षां करिष्यतः। तौ विज्ञान-प्रौद्योगिकी, नवाचारः, रक्षा-सुरक्षा, कृषिः, जलप्रबन्धनम्, व्यापार-अर्थव्यवस्था तथा च उभयदेशयोः जनानां परस्पर-सम्पर्कम् इत्यादीन् विषयान् अधिकृत्य सहयोगस्य अवसरेषु चर्चां करिष्यतः।उभौ नेतारौ पारस्परिक-हितस्य क्षेत्रीय-वैश्विक-मुद्देषु अपि विचार-विमर्शं करिष्यतः इति आशा अस्ति।

# न्यायालयस्य निर्णयः- भारतीय-युवा-काङ्ग्रेस-अध्यक्षः आरक्षकप्रतिबन्धकगृहे प्रेषितः

देहली-नगरस्य एकेन न्यायलयेन भारतीय-युवा-काङ्ग्रेस-अध्यक्षः उदय-भानु-चिबः ४ दिवसान् यावत् आरक्षकप्रतिबन्धकगृहे (Police Custody) प्रेषितः। सः 'भारत-मण्डपम्' मध्ये आयोजितस्य 'इण्डिया-एआई-इम्पैक्ट-समिट-२०२६' इत्यस्य विरोध-प्रदर्शनस्य सन्दर्भे निरुद्धः अस्ति। अधिकारिणाम् अनुसारं चिब-महोदयः अस्य विरोध-प्रदर्शनस्य मुख्य-षडयन्त्रकारी इति आरोपितः। सः राष्ट्र-विरोधी-उद्घोषणासु (नारा) अपि संलग्तः आसीत् इति श्रूयते। चिब-महोदयेन सह श्रीकृष्णा हरिः, कुन्दनयादवः, नरसिम्हा यादवः, अजयकुमारयादवः च सह-अभियुक्ताः सन्ति। देहली-आरक्षकाणां (Delhi Police) कथनं अस्ति यत् पृच्छा-काले (interrogation) चिब-महोदयः कर्तव्य-निरतान् आरक्षक-अधिकारिन् आक्रान्तवान्।



आरक्षकैः उक्तं यत् प्रकरणास्य अन्वेषणं प्रचलति, अग्रे अपि गहन-पृच्छायाः कृते तस्य हिरासत-अवधिं वर्धयितुं याचना कृता अस्ति।
चिब-महोदयः 'भारतीय-न्याय-संहिता' इत्यस्य विभिन्नासु धारासु निरुद्धः अस्ति। एतासु धारा १९६ अपि अन्तर्भवति, या धर्म-जाति-जन्मस्थान-निवास-भाषा-आधारेषु विभिन्न-समूहानां मध्ये विद्वेष-प्रसारणं निवारयितुं प्रयुज्यते। एषः अपराधः 'अजामीनपात्रः' (Non-bailable) अस्ति। शिखर-सम्मेलनस्य (Summit) समये युवा-काङ्ग्रेसस्य विरोध-प्रदर्शनस्य इदं प्रकरणं इदानीं देहली-आरक्षकाणां 'अपराध-शाखां' (Crime Branch) प्रति हस्तान्तरितं कृतम् अस्ति।

# राष्ट्रपतिः द्रौपदीमुर्मुः महाराष्ट्रस्य द्विदिवसीययात्रायै मुम्बई नगरं सम्प्राप्तवती



**हिमसंस्कृतवार्ताः** - राष्ट्रपतिः द्रौपदीमुर्मुः महाराष्ट्रस्य द्विदिवसीययात्रायै मुम्बई नगरं संप्राप्तवती। मुम्बई-नगरस्य छत्रपति शिवाजी-महाराज-अन्ताराष्ट्रिय-विमानस्थानके राज्यपालेन आचार्यदेवव्रतेन तस्याः स्वागतम् विहितम्। मुख्यमन्त्री देवेन्द्र फडनविसः, उपमुख्यमन्त्री एकनाथशिन्दे, सुनेत्रा अजित पवारः च अपि उपस्थिताः आसन्। राष्ट्रपतिः शीघ्रमेव लोकभवने पी. डी. हिन्दुजा चिकित्सालये आयोजिते 'सेविङ्ग लाईव्स ऐंड बिल्डिङ्ग अ हेल्दियर भारत' इत्येतस्य राष्ट्रव्यापि-अभियानस्य आरम्भः करिष्यति। राष्ट्रपतिः बुल्धाना-मण्डलस्य द्विसहस्रतमस्य शेगाव-नगरे केन्द्रीय-आयुष-मन्त्रालयेन आयोजिते षड्विंशत्यधिक वर्षस्य 'राष्ट्रिय-आरोग्य-मेलापकस्य उद्घाटनं करिष्यति। तदनन्तरं, सा नागपुरनगरे ब्रह्माकुमारीति संस्थया आयोजिते 'एकता-विश्वासाभ्यां महाराष्ट्रस्य स्वर्णयुगः' राज्यस्तरीयस्य कार्यक्रमस्य उद्घाटने भागं भजिष्यति।

# देशस्य अर्थव्यवस्थायां ८.१ प्रतिशतं वृद्धिः- एसबीआई-संस्थायाः प्रतिवेदनम्




भारतीय-स्टेट्-बैङ्क् (SBI) इत्यस्य अद्यतन-प्रतिवेदनानुसारं, चलितवित्तवर्षस्य तृतीय-त्रैमासिके देशस्य अर्थव्यवस्थायां ८.१ प्रतिशतं वृद्धिः अङ्किता। प्रतिवेदने उक्तं यत् ३१ दिसम्बर २०२५ दिनाङ्के समाप्ते त्रैमासिके आर्थिक-गतिविधयः सुदृढाः आसन्। वैश्विक-आव्हानानां (global challenges) सत्यपि अर्थव्यवस्था स्वकीयां विकास-गतिं स्थिरां रक्षितवती इति अपि अस्मिन् सूचितम्।
प्रतिवेदने प्रतिपादितं यत् कृषि-अकृषि-क्षेत्रयोः उत्साहवर्धक-प्रवृत्तीनां कारणात् ग्रामीण-क्षेत्रेषु उपभोगः (consumption) सुदृढः वर्तते। राजकोषीय-प्रोत्साहनेन (fiscal stimulus) गत-उत्सव-कालात् नगरेषु अपि उपभोगस्य निरन्तर-वृद्धिः अङ्किता। अयं अङ्कः तादृशे समये आगतः यदा भारतं स्वस्य 'सकल-घरेलू-उत्पादस्य' (GDP) आधार-वर्षं २०११-१२ तः संशोध्य २०२२-२३ इति कर्तुं गच्छति। नूतना 'जीडीपी-श्रृङ्खला' २७ फरवरी २०२६ दिनाङ्के प्रसारिता भविष्यति।

# हिमाचलस्य वित्तीयस्थितये जयराम‍ठाकुरः केन्द्रीयवित्तमन्त्रिणा सह मिलितवान्



**हिमसंस्कृतवार्ताः - शिमला।** विपक्षनेता जयरामठाकुरः हिमाचलप्रदेशस्य वित्तीयस्थितिं विषयं स्वीकृत्य नवदेहल्यां केन्द्रीयवित्तमन्त्रिणा निर्मलासीतारमण महोदयया सह मिलितवान्। अस्मिन् अवसरे सः 'राजस्वहानि-अनुदानस्य' (RDG) समाप्त्या उत्पन्नां स्थितिं केन्द्रात् प्राप्यमाणां वित्तीयसहायतां च प्रमुखतया चर्चितवान्। सः उदारवित्तीयसाहाय्यार्थं प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे कार्यं कुर्वते केन्द्रसर्वकाराय आभारं प्रकटितवान्।नवदेहल्यां मिलनानन्तरं शिमलातः प्रसारिते स्वकीये निवेदने विपक्षनेता राज्यसर्वकारस्य कार्यप्रणाल्यां प्रश्नान् उत्थापितवान्। सः अवदत् यत् मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू महोदयस्य नेतृत्वे सम्पूर्णं मन्त्रिमण्डलं नवदेहलीं प्राप्तवत्, परन्तु ते न तु प्रधानमन्त्रिणा सह मिलितवन्तः न च वित्तमन्त्रिणा सह। सः आरोपं कृतवान् यत् अस्मिन् काले सर्वे मन्त्रिणः स्व-स्व-नेतॄणां मेलने राजनैतिक-समीकरणानां व्यवस्थापने च व्यस्ताः आसन्। सः अवदत् यत् हिमाचलस्य यदि कापि सहायता भविष्यति, तर्हि सा केन्द्रसर्वकारस्य, प्रधानमन्त्रिणः वित्तमन्त्रिणः च माध्यमेन एव भविष्यति।
सः विस्मयं प्रकटितवान् यत् प्रधानमन्त्रिणा वित्तमन्त्रिणा च सह मिलितुं केनापि प्रयासः न कृतः। सः आरोपं कृतवान् यत् एतत् प्रमाणं वर्तते यत् काङ्ग्रेस-नेतारः केवलं राजनीतिं कर्तुं इच्छन्ति, हिमाचलस्य हितानां नाम्नि च 'नक्रेः अश्रूणि' (घड़ियाली आँसू) स्रावयन्ति। सः मुख्यमन्त्रिणं प्रति परामर्शं दत्तवान् यत् 'हिमाचल भवनं' सदनं च सदृशाणां राज्यप्रतिष्ठायाः प्रतीकानां प्रयोगः षड्यन्त्रार्थं न करणीयः। सः अवदत् यत् यदा तः केन्द्रे भाजपा-सर्वकारः अस्ति, तदा तः प्रदेशाय 'विशेषराज्यस्य स्थानम्' इत्यनेन सह उदारा वित्तीयसहायता च मिलिता अस्ति। विशेषराज्यस्य कारणेन केन्द्रपोषितासु १९१ योजनासु प्रदेशस्य सहभागिता केवलं १० प्रतिशतं भवति, अवशिष्टं ९० प्रतिशतं व्ययं केन्द्रसर्वकारः एव वहति।

## अस्मिन् मासे केन्द्रात् ३,००० कोटिरूप्यकाणां प्रकल्पाः लब्धाः

जयरामठाकुरः अवदत् यत् हिमाचलप्रदेशाय बाह्यसहायताप्राप्त-परियोजनानां (EAP) माध्यमेन केन्द्रेण ३,००० कोटिरूप्यकाणां साहाय्यं कृतम् अस्ति।
१. जायका-२ (JICA 2): स्वास्थ्यसुविधानां सुदृढीकरणाय १,६१७ कोटिरूप्यकाणां परियोजना स्वीकृता, यस्यां केन्द्रेण १,१६५ कोटिरूप्यकाणि वहिष्यन्ते। अनेन ५ चिकित्सा-महाविद्यालयानां ८६ स्वास्थ्यसंस्थानां च व्यवस्था परिष्करिष्यति।
२. विश्वबैङ्क-परियोजनाः आपदा-पुनर्निर्माणाय विश्वबैङ्क-पक्षतः १,९९२ कोटिरूप्यकाणां परियोजना स्वीकृता, यस्यां केन्द्रसर्वकारः १,७९२ कोटिरूप्यकाणां भुगतानं करिष्यति।

# शुद्ध-मतदातृ-सूची कस्यापि लोकतन्त्रस्य आधारः अस्ति- मुख्यनिर्वाचनायुक्तः




मुख्य-निर्वाचन-आयुक्तेन ज्ञानेश कुमारेण देशे शुद्ध-मतदातृ-सूच्यां बलम् प्रददता उक्तं यत् एतत् कस्यापि लोकतन्त्रस्य आधारः अस्ति इति। नवदिल्ल्याः भारतमण्डपे भारतस्य निर्वाचन-आयोगस्य तथा राज्य-निर्वाचन आयुक्तानां राष्ट्रिय-वर्तुलोत्पीठिका सम्मेलनम् अभिसंबोधयन् श्रीकुमारः उक्तवान्। मुख्य निर्वाचन आयुक्तः अवदत् यत् सर्वे योग्याः मतदातारः मतदातृ-सूच्यां समाविष्टं विशेष-गहन-संशोधन-प्रक्रिया आरब्धास्ति। निर्वाचन आयोगः मतदातृ-सूचीं शुद्धं सुलभं च कर्तुं, पारदर्शितायै मतदातॄणां सुगमतायै च महत्त्वं प्रददति इति श्रीकुमारेण दृढतया उक्तम्। सम्मेलनस्य प्राथमिकः उद्देश्यः निर्वाचन आयोगस्य, राज्य-निर्वाचन आयुक्तानां च कार्येषु, निर्वाचन-प्रक्रियायाः विषये, तेषां विधि-संरचनायाः अन्तर्गतं, समन्वयस्य संवर्धनम् अस्ति। अवधेयं यत् सप्तविंशति वर्षाणाम् अनन्तरं वर्तुलोत्पीठिका सम्मेलनम् आयोजितम्। अन्तिमम् एतादृशं सम्मेलनम् नवनवत्यधिक-ऊनविंशतिशत तमे वर्षे आयोजितमासीत्।

# हिमाचलप्रदेशस्य सुपर- विशेषज्ञ- चिकित्सालये चमियानास्थाने रोबोटिक-शल्यचिकित्सायाः शुल्कं बहु वर्धितम्, उपचारः महत्तर-मूल्यवान् जातम्



**हिमसंस्कृतवार्ताः- शिमला।** अटल इंस्टिट्यूट ऑफ़ मेडिकल सुपर स्पेशलिटी (एआईएमएसएस) चमियाना-चिकित्सालये रोबोटिक- शल्यचिकित्सा अधुना महत्तर-मूल्येन क्रियते। चिकित्सालयप्रशासनेन रोबोटिक-शल्यचिकित्सायाः शुल्के विंशतिसहस्र-रूप्यकाणि वर्धितानि। यत्र पूर्वं त्रिंशत्सहस्ररूप्यकाणि देयानि आसन्, अधुना तु पञ्चाशत्सहस्र-रूप्यकाणि दातव्यानि भवन्ति। वर्धित-मूल्यं प्रवर्तितमस्ति। आरकेएस-अनुमोदनानन्तरं गुप्तरीत्या शुल्कवृद्धिः कृता इति उक्तम्। गतवर्षस्य अगस्तमासे अत्र रोबोटिक-शल्यचिकित्साया सुविधा आरब्धा आसीत्। पूर्वनिर्धारितं त्रिंशत्सहस्र- रूप्यकाणां शुल्कं पञ्चाशत्सहस्र-रूप्यकाणि कृतम्।रोबोटिक-शल्यचिकित्सा न हिमकेअर-योजनया न च आयुष्मानभारत- योजनया आच्छाद्यते, अतः वर्धित-मूल्यस्य प्रत्यक्षप्रभावः रोगिषु भविष्यति। चिकित्सालय- प्रशासनस्य तर्कः अस्ति यत् शल्यक्रियायाः अर्धव्ययम् अद्यापि प्रदेश-सर्वकारेण वह्यते। यतः एका रोबोटिकशल्यक्रियायाः औसतव्ययः लक्षरूप्यकपर्यन्तं भवति, अतः शुल्कं त्रिंशत्-सहस्रात् पञ्चाशत्-सहस्रं कृतम्।सामान्यवार्डे भर्तीरोगिणः पञ्चाशत्सहस्र-रूप्यकाणि दातव्यानी, विशेषवार्डे भर्तीरोगिणः असीतिसहस्ररूप्यकाणि दातव्यानी। अद्यावधि चमियाना- चिकित्सालये शत-पञ्चाशताधिकाः रोबोटिकशल्यक्रियाः सम्पन्नाः सन्ति। तासु प्रोस्टेट, वृक्क, ट्यूमर-सम्बद्धाः शल्यक्रियाः अन्तर्भवन्ति। अपरत्र डॉ. राजेन्द्रप्रसाद- राजकीय- चिकित्सा-महाविद्यालय- टाण्डा इत्यत्र अपि रोबोटिक-शल्यचिकित्सायाः शुल्कवर्धनस्य सिद्धता क्रियते। इंदिरागाँधी- चिकित्सा- महाविद्यालये (आईजीएमसी) अपि रोबोटिक-शल्यचिकित्सां आरब्धुं सज्जता अस्ति।कम्पन्या आगताः द्विशत- निःशुल्क- उपकरण-सञ्चयेषु शत- पञ्चाशताधिकाः उपयुजिताः। शल्यक्रियायां प्रयुज्यमानानि उपकरणानि, अनुरक्षणम्, अन्यसामग्री च महत्तर-मूल्यवती। रोबोट-यन्त्रस्य नियमित- सेवा, तांत्रिक- समर्थने लक्ष-रूप्यक-पर्यन्तं व्ययः भवति। अतः भविष्यति काले शुल्के पुनरपि वृद्धिः सम्भाव्यते।रोबोटिक- शल्यचिकित्सा सामान्य-शल्यचिकित्सातः महत्तरमूल्यतरा भवति, यतः तत्र प्रयुज्यमानानि उपकरणानि अन्य-सामग्र्यः च महत्तर-मूल्यवती सन्ति। अतः प्रति-शल्यक्रियायाः पञ्चाशत्सहस्र-रूप्यकाणां शुल्कं निर्धारितम्।

**डॉ. सुधीर शर्मा,वरिष्ठ-चिकित्सा-अधीक्षक, चमियाना चिकित्सालयः।**

# युनः मादकद्रव्याणि त्यक्ष्यन्ति, क्रीडाः स्वीकरिष्यन्ति- अनुराग ठाकुरः




**हिमसंस्कृतवार्ताः- काङ्गड़ा।** 'हिमाचलप्रदेश- राज्य-वॉलीबॉलसङ्घेन' काङ्गड़ा- जनपदस्य शाहपुर-क्रीडाङ्गणे 'प्रथम- यूथ- वॉलीबॉल- चैम्पियनशिप' तथा 'मिनी हॉफ मैराथन' इत्यस्य भव्यम् आयोजनं कृतम्। अस्मिन् कार्यक्रमे यूनाम् उत्साहः, अनुशासनं, क्रीडाभावना च दर्शनीया आसीत्। कार्यक्रमस्य मुख्यातिथिरूपेण हमीरपुर-लोकसभाक्षेत्रस्य सासंदः पूर्वकेन्द्रीयमन्त्री च अनुरागसिंहठाकुरः उपस्थितः आसीत्। विशिष्टातिथिरूपेण वॉलीबॉलसङ्घस्य राष्ट्रियाध्यक्षः पूर्वमन्त्री च वीरेंद्रकंवरः अपि स्वकीयां गरिमामयीं उपस्थितिं दत्तवान्। स्वकीये सम्बोधने अनुरागसिंहठाकुरः युनः 'मादकद्रव्यसेवनम्' (नशा) सदृशात् सामाजिक-दोषतः दूरे स्थातुं आह्वानं कुर्वन् अवदत् यत्- "क्रीडाः यूनां व्यक्तित्व- निर्माणस्य सशक्तं माध्यमं वर्तन्ते।"

सः अवदत् यत् क्रीडाङ्गणे स्वेदं वहन्तः युनः एव प्रदेशस्य देशस्य च भविष्यं प्रकाशयन्ति। सः नूतनसन्ततिं क्रीडासु सक्रियां सहभागितां सुनिश्चितं कर्तुं तथा हिमाचलप्रदेशं क्रीडाक्षेत्रे अग्रणी-राज्यं निर्मातुं सङ्कल्पं ग्रहीतुं प्रेरितवान्। अनुरागसिंहठाकुरः उक्तवान् यत् २०१४ तमे वर्षे यदा प्रधानमन्त्रिणा नरेन्द्रमोदी महोदेयेन दायित्वं स्वीकृतं, तदा देशस्य क्रीडा-आयव्ययकम् (Sports Budget) ८०० कोटिरूप्यकाणि आसीत्, परन्तु अद्य प्रधानमन्त्रिणः नेतृत्त्वे देशस्य क्रीडा- आयव्ययकम् ३७०० कोटिरूप्यकाणि वर्तते, यत् 'यूपीए' सर्वकारस्य कालात् प्रायः पञ्चगुणिताधिकं वर्तते। प्रधानमन्त्रिणः नेतृत्त्वे केन्द्रसर्वकारः देशे 'क्रीडाक्रान्तिम्' आनेतुं वचनबद्धः अस्ति। प्रधानमन्त्री अन्ताराष्ट्रीय- प्रतियोगितासु पदक-जये अथवा पराजये अपि उभयत्र क्रीडकैः सह मिलति, तेषाम् उत्साहवर्धनं च करोति। अद्य यदा देशः २०३६-ओलम्पिक आयोजनाय सज्जः अस्ति, तदा अस्माकं प्रदेशसर्वकारेणापि अस्यां दिशि अग्रे गन्तव्यम्। प्रदेशे क्रीडा-आधारभूतसंरचनायाः सुदृढीकरणेन सह प्रशिक्षकाणां (Coaches) नियुक्तिः अतीव आवश्यकी अस्ति। 'हिमाचलप्रदेश-ओलम्पिक- सङ्घः' अपि प्रशिक्षकाणां नियुक्तौ गम्भीरतया कार्यं करोति। अनुरागसिंहठाकुरः अवदत् यत् राज्यस्तरीयात् स्पर्धातः क्रीडकाः चयनस्य परवर्तिषु सोपानेषु अवसरं प्राप्नुवन्ति। अस्माकं लक्ष्यं वर्तते यत् क्रीडकेभ्यः श्रेष्ठाः सुविधाः उपलब्धाः भवेयुः, निवेशः वर्धेत्, क्रीडकाः च आर्थिकरूपेण लाभान्विताः भवेयुः।

पूर्वमन्त्री वीरेंद्रकंवरः स्वकीये सम्बोधने अवदत् यत् क्रीडा केवलं प्रतियोगिता नास्ति, अपि तु चरित्रनिर्माणस्य आधारः वर्तते। ग्रामीण- नागरिकक्षेत्रेषु एतादृश्यः प्रतियोगिताः युवानं सकारात्मकं दिशं यच्छन्ति। सः आयोजनसमित्याः प्रशंसां कृतवान्। 'मिनी हॉफ मैराथन' मध्ये बहुसङ्ख्यकाः युवानः भागं गृहीतवन्तः। अस्मिन् अवसरे जिलाध्यक्षः कमलशर्मा सर्वेषाम् आभारं प्रकटितवान्। कार्यक्रमे विधायकः रणबीरसिंहनिक्का, पूर्वमन्त्री सरवीण चौधरी च सहिताः बहवः अन्ये गणमान्याः अतिथयः अपि उपस्थिताः आसन्।

✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# कश्चन प्रीतिसंवादः

संस्कृतमतीव सरलभाषा वर्तते । संस्कृतेन सरलतया लिख्यते चेत् लेखकस्य मनः मोदते, इतोऽपि लेखनोत्साहः प्राप्यते, क्रमशः लिलेखिषा वर्धते च । लोके संस्कृतस्य संरक्षणमपि एवमेव सम्भवति । अस्मिन् लेखे गुरुशिष्ययोर्मध्ये कदाचित् प्रवर्तितः प्रीतिसंवादः सरलभाषया अत्र उपस्थापयितुं प्रयत्यते । तयोः पारस्परिकः संवादः एवमस्तीति अवलोकनीयम् ।

शिष्यः - प्रणामाः गुरुवर्याः !

**गुरुः** - आगच्छ, उपविश वत्स ।आम्, अद्यतनी जिज्ञासा उपस्थाप्यताम् ।

**शिष्यः** - अस्तु, गुरुदेव ! हिन्दुसंस्कृतेः मूलस्वरूपं किमिति ज्ञातुमिच्छामि ।

**गुरुः** - आम् । प्रशस्यः प्रश्नोऽयम् ।श्रूयताम्, हिन्दुसंस्कृतेः मूलस्वरूपं नाम भारतीयजनानां पारम्परिकतया आगता काचित् नैतिकी, धार्मिकी वा गतिविधिः।

'हिन्दु'-शब्दः प्राचीनशास्त्रेषु नोपलभ्यते इत्यतः अस्य विषयस्य व्याख्यासम्बन्धे गभीर-मतभेदो दृश्यते । परन्तु एतत्सत्यं यत् भारतवर्षे समुत्पन्नः, सनातनधर्मोपरि अधिष्ठितः सर्वोऽपि सम्प्रदायः हिन्दुसंस्कृत्यां सम्मिलितो वर्तते । अर्थात् हिन्दुसंस्कृतिर्हि सर्वेषां मूलभूता । जैनः, बौद्धः, सिक्खः इत्यादिसम्प्रदायाः आत्मानं हिन्दुः इति न मन्यन्तां नाम, परं ते सनातनधर्मोपरि अवलम्बिताः, आर्यपरम्परायाः अङ्गभूताः सन्ति, अतस्ते अपि हिन्दवो हि परिगण्यन्ते । आं, तत्सनातनधर्मोपरि अधिष्ठितस्य हिन्दुत्वस्य तिस्रः धाराः वर्तन्ते - एका पारमार्थिकी, द्वितीया वैदिकी, तृतीया च लौकिकी इति । पारमार्थिकधारा इत्युक्ते वैदान्तिकधारा इति वा । वैदान्तिकधारा उपनिषद्भिः सह सुसम्बन्धम् आवहति, या परमार्थविषयम् अनुसृत्य निवृत्तिपरायणस्य धर्मस्य प्रचारं करोति । यद्यपि वैदिकधारा प्रवृत्तिविषयेण सह अधिकं सामञ्जस्यम् आवहति, तथापि एतस्याः अन्तिमं तात्पर्यमपि निवृत्तिर्हि वर्तते । लौकिकधारा व्यवहार-प्रधाना उच्यते । एवं प्रकारेण धारात्रये प्रवाहिता इयं हिन्दु-संस्कृतिः समस्त-संसाराय परमकल्याणकरं सन्देशं श्रावयन्ती स्थिता वर्तते ।

सनातनधर्मः हिन्दुसंस्कृतेः आत्मा कथ्यते । जैनधर्मः एतस्याः हृदयम्, बौद्धधर्मः एतस्याः बुद्धिः, सिक्खधर्मः एतस्याः बाहुः वर्तते । एवमेव वैष्णवधर्मः मुखम्, शैवधर्मः मस्तकम्, शाक्तधर्मः वीर्यम्, गाणपत्यधर्मः उदरम्, सौरधर्मः तेजः चेति । एवं प्रकारेण अन्यधर्माः अपि हिन्दुसंस्कृतेः इतराणि अङ्गप्रत्यङ्गानि मन्यन्ते । इत्थमेव या संस्कृतिः भिन्नेन भिन्नेन साधनेन दुर्वृत्तीनां हननं कर्तुं प्रचेष्टते सा हि हिन्दु-संस्कृतिः नाम । इयं चेष्टा निष्कामभावेन, शुद्धपारमार्थिकदृष्ट्या विचार्यते तर्हि परम्परया सदा हि भारतवर्षे हि प्रवर्तमाना अवलोक्यते, नान्यत्र ।

**शिष्यः** - आं गुरुदेव युक्तमेतत् । एतस्याः संस्कृतेः संस्थापकः चेत् कोऽपि स्याद्वा ?

गुरुः - आम्, अवश्यं सन्ति बहवः, न वा कश्चनः एकमात्रम् ।भारतीयसंस्कृतेः संस्थापकः मुख्यतः वेद एव। भागवतस्य ऋषभपुत्रः भरतः, रामायणस्य रामभ्राता भरतः, एवं महाभारतस्य शाकुन्तल-भरतः च इत्येतेषां नामानुगुणम् एतस्य देशस्य नामापि भारतम् इति जातम्। एवमेव हिन्दुसंस्कृतेः संस्थापकत्वेन ऋषिमहर्षयः, महापुरुषाः, सज्जनादयः यावन्तः पूर्वम् आसन् ते सर्वेऽपि संस्थापकाः हि इति वक्तुं शक्यते । ये सम्प्रति कालिकाः सज्जनपुरुषाः, गुरवः सन्ति, तेऽपि एनां संस्कृतिं हि अवलम्ब्य लोकाय शिक्षां प्रददति । एते सर्वेऽपि नमस्याः स्युरिति, कल्याणमस्तु । अस्तु, वत्स पुनर्मिलाव ।

**शिष्यः** - आम्, गुरुदेव प्रणमामि ।

# टांकरी लिपेः पुनरुत्थानाय आयोजिता कार्यशाला, द्वयोः छात्रवृत्तयोः घोषणा



**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा।** मण्डीनगरस्य 500 वर्षाणाम् ऐतिहासिक धरोहरस्य उपलक्ष्ये सरदारपटेलविश्वविद्यालयस्य मण्डी इत्यस्य इतिहासविभागस्य, भारतीयज्ञानपरम्पराप्रकोष्ठद्वारा च **'टांकरी लिपिः पुनरुत्थान एवं संरक्षण'** इति विषये एकदिवसीया कार्यशाला मांडवपरिसरे अयोजिता।कार्यक्रमस्य मुख्यातिथिः विश्वविद्यालयस्य कुलगुरुः आचार्यः ललितकुमार अवस्थी आसीत्। अध्यक्षत्वेन प्रो. पुष्पराजकपूरः सेवानिवृत्तः आचार्यः, वल्लभमहाविद्यालयः उपस्थितः आसीत्। मुख्यवक्तारूपेण हिमाचल- कला- संस्कृति- भाषा- अकादम्याः सेवानिवृतः सचिवः डॉ. कर्मसिंहः उपस्थितः आसीत्। विशिष्टातिथिषु इंटेक मण्डी चैप्टर इत्यस्य सह-संयोजकः अनिलशर्मा, अधिष्ठाता छात्रकल्याणम् आचार्यः राजेशकुमारशर्मा सम्मिलिताः आसन्। कार्यक्रमस्य संयोजनं इतिहासविभागाध्यक्षः डॉ. राकेशकुमारशर्मा अकरोत्। सः कार्यशालायाः उद्देश्यं प्रकटितवान्। मञ्चसञ्चालनं मनीषा अकरोत्। कार्यक्रमस्य शुभारंभः दीपप्रज्ज्वलनेन सरस्वती वंदनया च अभवत्। राष्ट्रगीतानन्तरं डॉ. रामपालः औपचारिकस्वागतम् अतिथीनां परिचयः च कारितवान्। स्वोद्बोधने मुख्यातिथिः आचार्यः ललितकुमार अवस्थीवर्यः आभासीमाध्यमेन उक्तवान यत् टांकरीलिपिः लेखनपद्धतिरेव न अपि तु हिमालयी- सांस्कृतिकचेतनायाः ऐतिहासिक- अभिव्यक्तिरस्ति। सः अस्याः संरक्षणं विश्वविद्यालयस्य बौद्धिकं दायित्वम् इति कथितवान्। मुख्यवक्ता डॉ. कर्मसिंहवर्यः टांकरीलिपेः ऐतिहासिकविकासस्य, शिलालेखेषु, पांडुलिपिसु, प्रशासनिक अभिलेखेषु च एतस्याः प्रयोगस्य विस्तृतं विवेचनम् अकरोत्। सः एतां पहाड़ी राज्यानां राजकीयं सांस्कृतिकं च अभिधानेन संयुक्ता लिपिः कठितवान्। महोदयेन शोधार्थिनः अस्याः व्यवस्थितं अभिलेखीकरणस्य, डिजिटलीकरणस्य च आवश्यकता उक्ता। विशिष्टातिथिः आचार्यः राजेशकुमारशर्मा भारतीय- ज्ञान- परम्परायाः संदर्भे टांकरीलिपेः महत्त्वं रेखांकयन् उक्तवान् यत् स्थानीयेतिहासस्य पुनर्लेखने अस्याः लिपेः अध्ययनम् अत्यंतसहायकं भविष्यति। पुष्पराजकपूरवर्यः अध्यक्षीयोद्बोधने टांकरीलिपिं हिमालयी- अंचलस्य सांस्कृतिक- अस्मितायाः, ऐतिहासिक- स्रोतसंपदायाश्च मूलाधारं कथितम्। तेनोक्तं यत् इयं लिपिः अवश्यमेव संरक्षणीया अन्यथा क्षेत्रीय-इतिहासस्य महत्वपूर्णः अध्यायः विलुप्तः भवितुं शक्नोति। अस्मिन् संदर्भे तेन प्रतिवर्षं छात्रवृत्तिद्वयं, प्रत्येकं एक सहस्ररूप्यकाणि प्रतिमासं प्रदातुं घोषणा कृता। प्रो. कपूरः स्पष्टम् अकरोत् यत् एते छात्रवृत्ती विशेषरूपेण तेभ्यः विद्यार्थिभ्यः, शोधार्थिभ्यश्च भविष्यतः ये टांकरीलिपेः अध्ययनं, पांडुलिपीनां पाठ-परिशोधनम्, अभिलेखानाम् अनुवादं, स्थानीयेतिहासस्य पुनर्लेखने च सक्रियरूपेण संलग्नाः भविष्यन्ति। तेन अयमपि परामर्शः दत्त यत् इयं चयनप्रक्रिया इतिहासविभागद्वारा निर्धारित- मानकानां यथा शोधप्रस्तावः, लिपि- पठनदक्षता, क्षेत्रीय- अभिलेखीयकार्याणाम् आधारेण भवेत्। येन योग्याः प्रतिबद्धविद्यार्थिनश्च प्रोत्साहिताः भवेयुः। डॉ. राकेशकुमारशर्मा अवदत् यत् डॉ. यज्ञदत्तशर्माद्वारा प्रतिदिनं टांकरीलिपेः प्रशिक्षणं भविष्यति, इतिहासविभागस्य शोधार्थिभ्यः, विद्यार्थिभ्यश्च प्राचीनतम- टांकरीलिपेः अभिलेखानां प्रारूपाणाञ्च ज्ञानं दास्यति। टांकरी लिपेः विशेषज्ञाः प्रबुद्धजनाः, मंडीक्षेत्रस्य विद्वान्सः डॉ. दलीप मोदगिलः, विनोद बहलः, ओ. सी. मल्होत्रा, डॉ. मंजू, अनिलः विभागाध्यक्षः लोकप्रशाशनं डॉ. रामपालः, सहायकाचार्यः राजेशशर्मा, विकेश राणा, कृष्णचंदः, इतिहास सोसाइटी- अध्यक्ष सानू कुमारः, सचिवः लखविंद्रः, दीपकदीपांशुश्च उपस्थितः आसन्।

## गृह-रक्षाविभागे भविष्यति ७०० स्वयंसेवकानां नियुक्तिः, ऑनलाइन-भविष्यति आवेदनस्य प्रक्रिया

**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य गृह-रक्षाविभागे ७०० स्वयंसेवकानां नियुक्तिः भविष्यति। विभागेन एतदर्थं 'अनलाइन' माध्यमेन आवेदनानि आमन्त्रितानि। आवेदनस्य अन्तिमा तिथिः ३१ मार्च (मार्चमासस्य एकत्रिंशत् दिनाङ्कः) निर्धारिता अस्ति। विभागस्य आधिकारिके जालपुटे (Website) आवेदनानि कर्तुं शक्यन्ते। एतेषु ७०० पदेषु-

१. ३५८ पदानि सामान्य-सेवायै (पुरुषाः),
२. १६७ पदानि सामान्य-सेवायै (महिलाः),
३. ७४ पदानि वाद्यवादकेभ्य (बैण्डमैन्),
४. ७६ पदानि 'चालकेभ्यः (ड्राइवर)
५. २५ पदानि च तान्त्रिक-ट्रेड्समैन (Technical Tradesman) इत्येतेभ्यः निर्धारितानि सन्ति। आवेदकैः स्वकीयाः शैक्षणिक- योग्यता- प्रमाणपत्राणि, 'मैट्रिक' (दशमीकक्षा) प्रमाणपत्राणि जालपुटे 'अपलोड' करणीयानि भविष्यन्ति। केवलं ते एव अभ्यर्थिनः योग्याः भविष्यन्ति, यैः मान्यताप्राप्तमण्डलात् (Board) दशमी (Matriculation), द्वादशी (10+2) वा अन्या निर्धारीता योग्यता प्राप्ता स्यात्।

# अप्रत्याशित- मेघविस्फोट- घटनाः सङ्कुचन्तः हिमनदाः च जलवायुपरिवर्तनस्य सङ्केताः- मुख्यमन्त्री सुक्खुः



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् जलवायुपरिवर्तनं एका गम्भीरा वैश्विकी समस्यारूपेण उद्भवति। अस्य परिणामस्वरूपं राज्ये अप्रत्याशित- मेघविस्फोटः, आकस्मिक- जलोत्प्लवः, भूस्खलनं, हिमनदानां सङ्कोचः सदृशाः घटनाः सम्मुखीभूताः। सः उक्तवान् यत् एताः घटनाः 'प्राकृतिकसचेतना' मत्वा तत्कालं परिष्कारात्मक- पदानि स्थापयितुं आवश्यकता अस्ति। २०२३ तमस्य वर्षस्य आपदः उल्लेखं कुर्वन् सः अवदत् यत् अस्यां प्राकृतिक-आपदि राज्ये २३,०००तः अधिकाणि गृहाणि क्षतिग्रस्तानि अभवन्। मुख्यमन्त्री सुक्खुमहोदयः मङ्गलवासरे 'साइंटिफिक असेसमेंट ऑफ टैकलिंग नॉन कार्बन- डाईऑक्साइड एमीशनसः पाथवेज फॉर हिमाचलप्रदेश' शीर्षकयुक्तं प्रतिवेदनम् विमुक्तवान्। अस्मिन् अवसरे सः अवदत् यत् हिमाचलप्रदेशः केवलम् एकः भौगोलिक-भूभागः नास्ति, अपि तु हिमालयस्य आत्मा वर्तते। हिमनदाः, नद्यः, वनानि, पर्वताः च अस्य परिचयाः सन्ति, येषु लक्षशः जनानां जीवनं निर्भरं वर्तते। हिमालयस्य अस्थिरतायाः दुष्परिणामाः न केवलं राज्ये, अपि तु सम्पूर्णे देशे भविष्यन्ति। सः अवदत् यत् राज्यं स्वकीयेभ्यः वैधानिक- अधिकारिभ्यः सङ्घर्षं करोति। यावत् पार्श्ववर्ति- राज्यानि 'भाखड़ा-ब्यास-प्रबन्धन-बोर्ड' (BBMB) इत्यस्य अवशिष्ट-धनस्य (Arrears) निस्ताराय दृढं आश्वासनं न यच्छन्ति, तावत् 'किशाऊ' तथा 'रेणुका' बन्धसदृशाः आगामी-परियोजनाः अग्रे न नेष्यन्ते। अस्मिन् विषये काश्चन सकारात्मक- प्रतिक्रियाः प्राप्ताः सन्ति।

### औषधीयपादपानां कृषिसंरक्षणाय द्वौ 'एमओयू' इति सञ्जातौ

अस्मिन् अवसरे 'मैसर्स डाबर इण्डिया लिमिटेड' तथा 'मैसर्स करण सिंह वैद्य सोलन' इत्येताभ्यां सह राज्ये औषधीयपादपानां कृषि-संरक्षण- प्रोत्साहनाय द्वे सहमतिपत्रे हस्ताक्षरिते। प्रथम-सहमत्यानुसारं डाबर इण्डिया प्रतिवर्षं कृषकेभ्यः १२ लक्षं गुणवत्तापूर्ण-पादपान् (दशवर्षेषु १.२० कोटि- पादपान्) प्रदास्यति। निम्न- मध्य- पर्वतीयक्षेत्रेभ्यः आमलकी (आंवला), हरीतिकी (हरड़), विभीतकः (बहेड़ा), काकड़ासिंगी, लोधर च सदृशाः प्रजातयः ऊना, बिलासपुरं, हमीरपुरं, काङ्गड़ा, सिरमौरः, निम्न-शिमलाक्षेत्रेषु च वितरिष्यन्ते।

## मध्य-उच्च-पर्वतीय-क्षेत्रेषु वितरणम्

मध्य-उच्च-पर्वतीय-क्षेत्रेभ्यः जटामांसी, कुटकी, सुगन्धबाला, पद्म-काष्ठम्, पुष्करमूलम् च कुल्लू, चम्बा, मण्डी, उपरि-शिमला, किन्नौर जनपदेषु वितरिष्यन्ते। अतीस, विष (वत्सनाभः) सदृशाः अल्पाइन-प्रजातयः किन्नौर- लाहौल- स्पीति- चम्बाक्षेत्राणां कृषकेभ्यः उपलब्धाः भविष्यन्ति। द्वितीयः सहमतिः करणसिंहवैद्यसोलनम् इत्यनेन सह पञ्चवर्षाणां कृते सञ्जातः, यस्य अन्तर्गतं सोलनजनपदे हरिद्रा (हल्दी), अश्वगन्धा, शतावरी, तुलसी, चिरायता, हिमालयन जेंटियन इत्यादीनां कृषये ६ मुख्य-प्रजातयः चिताः। अस्मिन् १०८ बीघाभूमौ २२५ महिलाकृषकाः सम्मिलिताः भविष्यन्ति।

## हिमाचलम् प्रथमं 'हरित-ऊर्जा-राज्यं' निर्मातुं सर्वकारः कटिबद्धः- मुख्यमन्त्री

मुख्यमन्त्री अवदत् यत् वर्तमान-राज्यसर्वकारः हिमाचलप्रदेशं देशस्य प्रथमं 'हरित-ऊर्जा-राज्यं' निर्मातुं कटिबद्धः अस्ति। पर्यावरण-संरक्षणाय 'इलेक्ट्रिक- मोबिलिटी' प्रोत्साह्यते। अस्मिन् वर्षे अप्रैलमासं यावत् एचआरटीसी विभागस्य समूहे ३०० नूतनानि 'ई-बस' यानानि सम्मिलितानि भविष्यन्ति। ३८,००० ई-टैक्सी-यानानां कृते ४० प्रतिशतानुदानम् प्रदीयते। अस्मिन् अवसरे विधायकः सुरेश कुमारः, हरीश जनारथा, सचिवः (पर्यावरणम्) एस.के. सिङ्गला, डॉ. डर्वुड जैल्के, मार्टिना ओटो, जेरिन ओशो, डी. सी. राणा च उपस्थिताः आसन्।

# संस्कृतभारत्या अखिलभारतीयशलाकपरीक्षा देहल्यां सम्पन्ना








## प्राचीनभारतीय- ज्ञानपरम्परायामत्यन्तविशिष्टा पद्धतिः शलाकापरीक्षा- कुलगुरुः प्रो. शिवशङ्करमिश्रः

हिमसंस्कृतवार्ताः- डॉ. विजयकुमारः। संस्कृतपरम्परायाः गौरवस्य संरक्षणार्थं संवर्धनार्थञ्च शास्त्राणामध्ययनस्य च प्रोत्साहणाय संस्कृतभारती एवञ्च श्रीजयरामब्रह्मचर्याश्रमः, देहली इत्यनयोः संयुक्ततत्त्वावधानेन शास्त्रस्य सर्वोत्कृष्टा अखिलभारतीया शलाकापरीक्षा फरवरी-मासस्य द्वाविंशतिदिनांके श्रीजयरामब्रह्मचर्याश्रमे, देहल्यां समायोजिता। अस्यां राष्ट्रियस्तरीयप्रतियोगितायां देशस्य विभिन्नकोणे विद्यमानानां संस्कृतगुरुकुलानां, शैक्षणिकसंस्थानां च १४८ प्रतिभाशालिनः प्रतिभागिनः उत्साहेन भागं गृहीतवन्तः। अस्यां शालाकापरीक्षायां दश प्रतियोगितानाम् आयोजनं क्रियते, येषु व्याकरणविषये वैयाकरणसिद्धान्तकौमुदी, न्यायविषये न्यायसिद्धान्तमुक्तावली, वेदान्तविषये वेदान्तपरिभाषा, सांख्यदर्शने सांख्यतत्त्वकौमुदीसहिता सांख्यकारिका, साहित्ये काव्यप्रकाशः, ज्योतिषे सूर्यसिद्धान्तः, मीमांसायाम् अर्थसङ्ग्रहः, लघुसिद्धान्तकौमुदी, अमरकोषश्चैते विषयाः प्रतियोगितायां निर्धारिता आसन्। उपर्युक्तेषु विषयेषु समागतानां प्रतिभागिनां परीक्षणार्थं देशस्य विभिन्नप्रदेशेभ्यः स्वस्वशास्त्रे कृतभूरिश्रमाः विद्वांसः समाहूताः। एतेषां प्रख्यातविदुषां समक्षं छात्राः शास्त्रीयप्रश्नानां शीघ्रं, सटीकं, प्रामाणिकं च उत्तरं समुपस्थाप्य स्वस्य असाधारणप्रतिभां, कमप्यपूर्वां स्मृतिं, गहनाध्ययनं च प्रदर्शितवन्तः। परीक्षा त्रिषु चक्रेषु आयोज्यते। प्रथमचक्रे स्मृतिपरीक्षा (ग्रन्थः कण्ठस्थः अस्ति न वेति परीक्षा), तत्र उत्तीर्णः प्रतिभागी द्वितीयचक्रं प्रविशति। द्वितीयचक्रे शास्त्रपरीक्षा (शास्त्रस्य अर्थज्ञानम् अस्ति न वेति परीक्षा)। द्वितीयचक्रे उत्तीर्णः प्रतिभागी तृतीयचक्रे प्रवेष्टुम् अर्हति। तृतीयचक्रे विशिष्टपरीक्षा (शास्त्रस्य तात्पर्यादिज्ञानम् अस्ति न वेति परीक्षा)। तत्र प्रत्येकविषये प्रथमद्वितीयतृतीयस्थाने चितानां प्रतिभागिनां पुरस्कारराशिः प्रदीयते| प्रतिविषये प्रथमस्थानस्य कृते 20,000/ विंशतिसहस्त्र, द्वितीयस्थानस्य कृते 15,000/ पञ्चदशसहस्त्र, तृतीयस्थानस्य कृते 10,000/ दशसहस्त्र धनं निर्धारितं वर्त्तते। प्रतिभागिनां परीक्षणानन्तरं सम्पूर्त्तिसमारोहे संस्कृतभारत्या अखिलभारतीयाध्यक्षः प्रो. रमेशकुमारपाण्डेय अवदत् यत्, "शलाकपरीक्षा न केवलं स्पर्धा, अपि तु अस्माकं गौरवपूर्णशास्त्रपरम्परायाः सजीवोत्सवः विद्यते। अयं कार्यक्रमः संस्कृतस्य संरक्षणे प्रचारे च आधारभित्तिः वर्तते। शास्त्रसंरक्षणं पवित्रं कार्यमस्ति अत एव प्रत्येकस्य भारतीयस्य संस्कृतप्रेमिणश्च अवश्यं कर्त्तव्यम्| संस्कृतभारत्याः विद्वत्परिषदः अध्यक्षेण प्रो. गोपबन्धुमिश्रेण उक्तं यत् अस्याः स्पर्धायाः दिल्लीनगरे आयोजनम् अवश्यमेव गौरवस्य आनन्दस्य च विषयः अस्ति। अखिलभारतीय-शलाकापरीक्षासंयोजकः महर्षिपाणिनि- संस्कृत- वैदिक- विश्वविद्यालयस्य कुलपतिः प्रो. शिवशंकरमिश्रः अवदत् यत् प्राचीनभारतीयशैक्षिकपरम्परायां शलाकापरीक्षा अद्वितीया प्रभावी च पद्धतिः विद्यते। अस्यां परीक्षायाम् आचार्यः ग्रन्थस्य कस्मिन्नपि पृष्ठे शलाकां (लघुदण्डं) स्थापयति, तस्मात् स्थानात् छात्रः ग्रन्थस्य अग्रिमं भागं श्रावयति। न केवलं पाठः, अपि तु तस्य अर्थः, व्याख्या, विस्तृतव्याख्यानञ्च अवश्यम् उपस्थापयति। एषा शलाकापरीक्षा पूर्णतया मौखिकरूपेण भवति, यत्र छात्रस्य स्मृतिः, तत्क्षणोत्तरदानक्षमता, शास्त्रीयज्ञानस्य गभीरता च परीक्षिता भवति। श्रीजयरामब्रह्मचर्य- आश्रमे विगतवर्षद्वयात् दिल्लीनगरे अस्याः शलाकापरीक्षायाः सफलतया आयोजनं जायमानं विद्यते। शलाकपरीक्षा पारम्परिकपरीक्षाव्यवस्था अस्ति, छात्रा एकवर्षपूर्वं निर्धारितानां संस्कृतग्रन्थानां व्यवस्थितरूपेण अध्ययनेन, निरन्तरस्वाध्यायेन च आचार्येभ्यः ज्ञानमवाप्नुवन्ति। संस्कृतभारत्या अखिलभारतीय-सङ्घठनमन्त्री जयप्रकाशगौतमः कथितवान् यत्, "संस्कृतभारत्या उद्देश्यं समाजे एतादृशं संस्कृतस्य वातावरणस्य निर्मातुं वर्तते यत् संस्कृतभाषा सामान्यभाषारूपेण स्थापिता भवेत्, येन विश्वसमुदायः भारतस्य वैभवेन प्रेरितो भवतु। संस्कृतशास्त्राणां संरक्षणेन, प्रसारणेन च समाजः सांस्कृतिकवैभवमधिगच्छन् भव्यभारतं निर्मातुं समर्थो भविष्यति। शलाकापरीक्षायाः नियन्त्रकः प्रो. कृष्णकान्तशर्ममहोदयः स्वमतं प्रकटयन् अवदत्- "संस्कृतस्य संस्कृतेः च संरक्षणं शास्त्रस्य नियमितस्वाध्यायेन गुरुशिष्यपरम्परायाः सुदृढीकरणेन चैव सम्भवति। शास्त्रेषु निहितं ज्ञानं विज्ञानं परम्परां च यूनां बोधः स्यादिति अस्माकं दायित्वमस्ति। आगामिवर्षे मार्चमासे महर्षिपाणिनि-संस्कृत- वैदिक- विश्वविद्यालये उज्जयिन्याम् इयं शलाकापरीक्षा भविष्यदीति उद्घोषेण शान्तिमन्त्रपाठेन च स्पर्धेयं सम्पूर्णता अवाप्ता।

# केन्द्रीय-संस्कृत-विश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेड़ी 'संस्कृतात्मा-पुरस्कारेण' सम्मानितः




**हिमसंस्कृतवार्ताः- डॉ रेणुका बोकारे, संगमनेरम् (महाराष्ट्रम्)।** शिक्षण- प्रसारक- संस्थायाः संगमनेर- महाविद्यालयेन 'श्री ओंकारनाथ- मालपाणी- संस्कृत- संशोधन- केन्द्रस्य' 'श्री जगन्नाथ- नरसिंगदास- कलन्त्री- क्रीडाभवने' 'संस्कृतात्मा- सम्मानसमारोहः २०२५-२६' आयोजितः। अस्मिन् समारोहे केन्द्रीय- संस्कृत- विश्वविद्यालयस्य (नवदेहली) कुलपतये प्रो. श्रीनिवास- वरखेड़ी- महोदयाय प्रतिष्ठितः 'संस्कृतात्मापुरस्कारः २०२५-२६' प्रदत्तः। प्रो. श्रीनिवास- वरखेड़ी- महोदयाय तस्य संस्कृतसेवायै सम्मानस्वरूपं ₹५१,००० (एकपञ्चाशत्- सहस्रम्) रूप्यकाणां धनराशिः, प्रशस्तिपत्रं, स्मृतिचिह्नम्, उत्तरीयं, श्रीफलं च प्रदाय सम्मानितं कृतम्। अस्मिन् कार्यक्रमे 'मालपाणी- परिवार- चैरिटेबल- ट्रस्ट' इत्यस्य ललितादेवी मालपाणी महोदयायाः गरिमामयी उपस्थितिः आसीत्। समारोहे संस्थायाः कार्याध्यक्षः डॉ. संजय मालपाणी, प्राचार्यः डॉ. अरुण गायकवाडः, संस्कृतविभागाध्यक्षः डॉ. अनिरुद्ध मण्डलिकः च सह बहुसङ्ख्याकाः प्राध्यापकाः, शोधार्थिनः छात्राश्च उपस्थिताः आसन्।पुरस्कारग्रहणानन्तरं प्रो. श्रीनिवास- वरखेड़ी- महोदयः स्वकीय-उद्बोधने अवदत् यत् "संस्कृतं केवलम् एका भाषा न, अपि तु भारतीयसंस्कृतेः उन्नत- ज्ञान- विज्ञानस्य च आधारशिला वर्तते। आधुनिक-तन्त्रज्ञानस्य परम्परायाः च समन्वयेन एतां नूतनसततिं यावत् प्रापणं अस्माकं सामूहिकं दायित्वं वर्तते।" प्रो. वरखेड़ी-महोदयाय इदं सम्मानं संस्कृतस्य प्रचारप्रसाराय, भारतीय- ज्ञान- परम्परायाः संरक्षणे तस्य वैश्विक-योगदानाय प्रदत्तः अस्ति।

## लौकिकन्यायकोशः" (४०८)
## " कम्बलिनिर्णेजनन्यायः"

एकदैव [एकस्मिन् एव काले] कार्यद्वयस्य सिद्धिः इत्यस्मिन् अर्थे अस्य न्यायस्य प्रयोगः भवति | कम्बलप्रक्षानसमये तेन हस्तपादयोः अपि प्रक्षालनं भवति |
पश्यन्तु-- निर्णेजनं ह्युभयं करोति कम्बलशुद्धिं पादयोश्च निर्मलताम् | [शाबरभाष्यम् जैमिनि २-२५]

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। मया एका उत्तमा वार्ता पठिता। लोहगयाने एकेन पित्रा स्वपुत्रेण विकीर्णानि शुष्कभक्ष्याणि पुनः सङ्गृहीतानि। एतेन बालकाय स्वच्छतायाः पाठः पाठितः। जनाः एतत् दृष्ट्वा तस्य प्रशंसाम् कृतवन्तः सन्ति।
**नन्दिनी-** आम्, सः उत्तमः संस्कारः अस्ति। बाल्यात् एव अनुशासनम् आवश्यकम्। किन्तु बेङ्गलूरु-नगरे एकेन तन्त्रज्ञेन एका कृत्रिम-मेधा-प्रणाली निर्मिता। तेन स्वस्य शयनकक्षस्य व्यजनम् नियन्त्रितम्। रात्रौ तापमान-अनुसारं व्यजनस्य गतिः स्वयम् एव न्यूना वा अधिका वा भवेत् इति व्यवस्था तेन कृता अस्ति।
**काव्या-** अहो! एतत् तन्त्रज्ञानं साहाय्यकम् अस्ति। इदानीं पश्चिम-वङ्गस्य एका वार्ता श्रूयताम्। तत्र सुन्दरवन-ग्रामे विद्युत्-स्तम्भाः ग्रामवासिभिः कृष्णपट्टिका-रूपेण परिवर्तिताः सन्ति। मार्गः एव मुक्ताकाश-विद्यालयः कृतः। बालाः मार्गे चलन्तः अक्षराणि गणितं च पठितवन्तः सन्ति।
**नन्दिनी-** अतीव शोभनः प्रयासः। एतेन शिक्षा सुलभा जाता। परन्तु बिहार-राज्ये राजगीर-क्षेत्रे जनैः काचित् चिन्ताजनका घटना कृता। तत्र एकस्मिन् वृक्षे स्व-इच्छा-पूर्त्यै जनैः बहूनि लोह-नाणकानि प्रविष्टानि। अनेन कारणेन सः वृक्षः शुष्कः जातः अस्ति। पर्यावरण-रक्षकाः एतत् दृष्ट्वा चिन्ताम् प्रकटितवन्तः सन्ति।
**काव्या-** आम्, अन्धविश्वासेन प्रकृतेः हानिः न करणीया। अद्यतन-वार्ताः अत्रैव समाप्ताः। धन्यवादः।

**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**